# ShAnti Prarthana A Prayer for Peace

# શાન્તિપ્રાર્થના

## Document Information

Text title : shAntiprArthanA, A prayer for peace

File name : shAntiprArthanA.itx

Category : devii, devI, misc, dashamahAvidyA

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : bAlAsaparyAntargatam

Latest update : June 3, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શાન્તિપ્રાર્થના

માઽહં બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરોત્ ।
અનિરાકરણં મેઽસ્તુ અનિરાકરણં મમ ॥ ૧॥

સ્વાવિદ્યૈકનિબદ્ધોઽકરવં કર્માણિ મુહ્યમાનઃ સન્ ।
દૈવાદ્વિધૂતબન્ધઃ સ્વાત્મજ્ઞાનાન્મુનિઃ સ્યાં વા ॥ ૨॥

માયાવશેન સુપ્તો મધ્યેઽપશ્યં સહસ્રશઃ સ્વપ્નાન્ ।
દેશિકવચઃ પ્રબુદ્ધો દીવ્યેયં મોદવારિધૌ કિં વા ॥ ૩॥

જનિવિપરીતક્રમતો બુદ્ધ્યા પ્રવિલાપ્ય પઞ્ચભૂતાનિ ।
પરિશિષ્ટમાત્મતત્ત્વં પશ્યેયં વા મુનિઃ શાન્તઃ ॥ ૪॥

જગદખિલમિદમસારં માયિકમેવેતિ મનસિ મનનેન ।
પર્યટનપાટિતાશઃ પ્રગલિતમદમત્સરઃ સ્યાં વા ॥ ૫॥

ત્વમહમભિમાનવિહીનો મોદિતનાનાજનાચારઃ ।
બાલાચરિતઃ સ્યાં વા વિમલસુખામ્ભોનિધૌ મગ્નઃ ॥ ૬॥

અવધૂતકર્મજાલો જડબધિરાન્ધોપમાચારઃ ।
આત્મારામો યતવાગકુતશ્ચનવસતિરાસીય ॥ ૭॥

ચપલં મનઃકુરઙ્ગં ચારુ નિગૃહ્ણન્વિમર્શવાગુરયા ।
નિગમારણ્યવિહારશ્રાન્તં શાન્તં વિદધ્યાં વા ॥ ૮॥

સન્ત્યજ્ય શાસ્ત્રવાર્તાઃ સંવ્યવહારં ચ લૌકિકં ત્યક્ત્વા ।
અન્તરનુસન્દધન્મનું તે સ્યાં વા નિષ્કમ્પદીપવદ્યોગી ॥ ૯॥

જાત્યભિમાનવિહીનો જન્તુષુ સર્વત્ર પૂર્ણતાં પશ્યન્ ।
ભૂતં ભાવિ ચ ન વિદન્ નિર્મૃષ્ટાશેષવિષયેહઃ ॥ ૧૦॥

ત્યજતશ્ચ ન સમ્પન્નં નાસમ્પન્નં ચ વાઞ્છતઃ ક્વાપિ ।
તૃપ્તિમનુત્તમસીમાં લબ્ધવતઃ કિં લભેય પદમ્ ॥ ૧૧॥

ઇતિ શાન્તિપ્રાર્થના સમાપ્તા ।

Proofread by PSA Easwaran

*ShAnti Prarthana A Prayer for Peace*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*